"त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् ।
नाड़ीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते ॥"
इति प्रायश्चित्ततत्त्वम् ॥

तत्कार्थक्यं यथा,—
"समुद्रे हिमवत्पार्श्वे नद्यामस्याञ्च दुर्म्मते ।
रात्रावहनि सन्ध्यायां कस्य गुप्तः परिग्रहः ॥"
इति तिथ्यादितत्त्वम् ॥*॥

त्रिसन्ध्याकालीनोपासना । तत्कालोपास्या देवता । यथा । अथ सन्ध्योपासनम् । तत्र छन्दोगपरिशिष्टम् ।
"अत ऊर्द्धं प्रवक्ष्यामि सन्ध्योपासनिकं विधिम्
अनर्हः कर्म्मणां विप्रः सन्ध्याहीनो यतः स्मृतः ॥"
अतः प्रातःस्नानानन्तरम् । तथा,—
"एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम्
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते ॥"
शातातपः ।
"अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववादिना ।
आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी ॥
तृतीयो बहुयाज्यः स्याच्चतुर्थो ग्रामयाजकः ।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च ॥
अनागतान्तु यः पूर्व्वां सादित्याञ्चैव पश्चिमाम् ।
नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः ॥"
राजभृतो राजसेवकः । ग्रामादेर्भृतो भरणीयः । ग्रामलक्षणमाह मार्कण्डेयपुराणम् ।
तथा शूद्रजनप्रायाः सुसमृद्धकृषीवलाः ।
क्षेत्रोपयोगभूमध्ये वसतिर्ग्रामसंज्ञिका ॥"
अत्र सन्ध्यात्रयस्य नित्यत्वाभिधानात् ।
"सर्व्वकालमुपस्थानं सन्ध्यायाः पार्थिवेष्यते ।
अन्यत्र सूतकाशौचविभ्रमातुरभीतितः ॥"
इति विष्णुपुराणीये सन्ध्याया इत्येकवचनान्तपाठो धर्म्मकोषोक्तो युक्तः । एवमेव नव्यवर्द्धमानः । सर्व्वकालं प्रातर्म्मध्याह्नसायंरूपकालत्रये । अन्यथा तदुपादानं व्यर्थं स्यात् । विभ्रमश्चित्तविक्षेपः । तेन क्षतादावपि सन्ध्यामाचरन्ति । अतएव याज्ञवल्क्यः ।
"सर्व्वावस्थोऽपि यो विप्रः सन्ध्योपासनतत्परः ।
ब्राह्मण्याच्च न हीयेत अन्त्यजन्मगतोऽपि सन् ॥"
सर्व्वावस्थोऽपि नित्यं सेवकादिकर्म्मरतोऽपि । यथोचितशौचेऽप्यशक्तोऽपि इति रत्नाकरः ॥ अन्धाद्यवस्थापन्नोऽपीति युक्तम् ॥*॥ सन्ध्यात्रयसाधारणलक्षणमाह योगियाज्ञवल्क्यः ।
"अयाणाञ्चैव वेदानां ब्रह्मादीनां समागमः ।
सन्धिः सर्व्वसुराणाञ्च तेन सन्ध्या प्रकीर्त्तिता ॥"
सन्ध्यात्रयकालस्तु अहोरात्रसम्बन्धिमुहूर्त्तात्मकः । तथा च दक्षः ।
"अहोरात्रस्य यः सन्धिः सूर्य्यनक्षत्रवर्ज्जितः ।
सा च सन्ध्या समाख्याता मुनिभिस्तत्त्ववादिभिः ॥"
सूर्य्यनक्षत्रवर्ज्जितः । अर्द्धास्तमितार्द्धोदितसूर्य्यमण्डलप्रकृष्टतेजोनक्षत्रवर्ज्जितः । तथा च वराहः ।
"अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत् ।
तेजःपरिहानिमुखा भानोरर्द्धोदयं यावत् ॥"
अथ आद्यन्तता उक्ता । परिमाणमाह दक्षः ।
"रात्र्यन्तकाले नाड्यौ द्वे सन्ध्यादिः काल उच्यते ।
दर्शनादरविरेखायास्तदन्तो मुनिभिः स्मृतः ॥"
नाड़ीदण्डः । योगी याज्ञवल्क्यः ।
"ह्रासवृद्धी च सततं दिनरात्र्योर्यथाक्रमम् ।
सन्ध्या मुहूर्त्तमाख्याता ह्रासे वृद्धौ समा स्मृता ॥"
अत्रोपासनाया अपि सन्ध्यात्वमाह व्यासः ।
"उपास्ते सन्धिवेलायां निशाया दिवसस्य च ।
तामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिणः ॥"
उपास्ते वक्ष्यमाणप्राणायामादिक्रिययेति यावत् ॥*॥ तत्काले उपास्या अपि देवता सन्ध्या । तथा च याज्ञवल्क्यः ।
"सन्धौ सन्ध्यामुपासीत नास्तगे नोद्गते रवौ ॥"
उपासनोपक्रममाह संवर्त्तः ।
"प्रातःसन्ध्यां सनक्षत्रामुपासीत यथाविधि ।
सादित्यां पश्चिमां सन्ध्यां अर्द्धास्तमितभास्कराम् ॥"
सनक्षत्रामित्यनेन तद्युक्तकाले उपक्रम्य प्रातःसन्ध्यामुपासीत । एवमेवार्द्धास्तमितभास्करारब्धां पश्चिमां सादित्यामित्यनेन तद्युक्तकाले उपक्रम्य उपासीतेत्यर्थः ॥*॥ मध्याह्नसन्ध्याया अष्टममुहूर्त्तं कालमाह स्मृतिः ॥
"पूर्व्वापरे तथा सन्ध्ये सनक्षत्रे प्रकीर्त्तिते ।
समसूर्य्येऽपि मध्याह्ने मुहूर्त्तसप्तमोपरि ॥"
सांख्यायनगृह्यम् । अरण्ये समित्पाणिः सन्ध्यामुपास्ते नित्यं वाग्यत उत्तरापराभिमुखोऽन्वष्टमदिशमानक्षत्रदर्शनात् । अतिक्रान्तायां महाव्याहृतीः सावित्रीं स्वस्त्ययनादि जप्त्वा एवं प्रातः प्राङ्मुखस्तिष्ठन् आमण्डलदर्शनादिति, उत्तरापराभिमुखो वायुकोणाभिमुखः । कोणं विवृणोति अन्वष्टमदिशमिति । उभयदिगष्टमभागमिति यावत् । व्यासः ।
"गायत्री नाम पूर्व्वाह्णे सावित्री मध्यमे दिने
सरस्वती च सायाह्ने सैव सन्ध्या त्रिषु स्मृता ॥
प्रतिग्रहान्न दोषाच्च पातकादुपपातकात् ।
गायत्री प्रोच्यते तस्मात् गायन्तं त्रायते यतः ॥
सवितृद्योतनात् सैव सावित्री परिकीर्त्तिता ।
जगतः प्रसवित्रीत्वात् वाग्रूपत्वात् सरस्वती ॥"
तैत्तिरीयब्राह्मणम् । उद्यन्तमस्तं यान्तं आदित्यमभिध्यायन् कुर्व्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुते । असावादित्यो ब्रह्म इति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेदेत्ययमर्थः । वक्ष्यमाणप्रकारेण प्राणायामादिकं कुर्व्वन् यथोक्तनामरूपोपेतं सन्ध्याशब्दस्य वाच्यमादित्यं ब्रह्मेति ध्यायन् ऐहिकमामुष्मिकञ्च सकलभद्रमश्नुते । य एवमुक्तध्यानेन शुद्धान्तःकरणो ब्रह्मसाक्षात्कुरुते स पूर्व्वमपि ब्रह्मैव सन् प्रज्ञावान् चिरजीवित्वं प्राप्तो यथोक्तज्ञानेनाज्ञानोपशमे ब्रह्मैव प्राप्नोति । इति पराशरभाष्ये माधवाचार्य्यः ॥
अतएव व्यासः ।
"न भिन्नां प्रतिपद्येत गायत्त्रीं ब्रह्मणा सह ।
सोऽहमस्मीत्युपासीत विधिना येन केनचित् ॥"*॥
गायत्त्रीशब्दमर्म्मपदप्रतिपाद्य ईश्वरः । अहं जीवरूपोऽस्मि भवामि इति । अजहत्स्वार्थलक्षणया जीवेश्वरयोरहंकारप्रतिफलितत्वोपाधिरहितेन चिद्रूपेणैक्यम् । घटाकाशगृहाकाशयोरुपाधिरित्यवगमात् । ऐक्यमिव भावयन् उपासीत । याज्ञवल्क्योऽपि ।
"या सन्ध्या सा तु गायत्त्री द्विधा भूत्वा प्रतिष्ठिता ।
सन्ध्या उपासिता येन विष्णुस्तेन उपासितः ॥"*
उपासनायाः फलमाह स एव ।
"गवां सर्पिः शरीरस्थं न करोत्यङ्गपोषणम् ।
निःसृतं कर्म्मसंयुक्तं पुनस्तासां तदौषधम् ॥
एवं स हि शरीरस्थः सर्पिर्वत् परमेश्वरः ।
विना चोपासनादेव न करोति हितं नृषु ॥
प्रणवव्याहृतिभ्याञ्च गायत्त्र्या त्रितयेन च ।
उपास्यं परमं ब्रह्म आत्मा यत्र प्रतिष्ठितः ॥"
त्रितयेन प्रणवादित्रितयेन ब्रह्मप्रतिपादकेनोच्चारितेन तदर्थावगमेन उपास्यं प्रसादनीयम् । तदाह स एव ।
"वाच्यः स ईश्वरः प्रोक्तो वाचकः प्रणवः स्मृतः
वाचकेऽपि च विज्ञाते वाच्य एव प्रसीदति ॥
भूर्भुवःस्वस्तथा पूर्व्वं स्वयमेव स्वयम्भुवा ।
व्याहृता ज्ञानदेहेन तस्मात् व्याहृतयः स्मृताः ॥"
ज्ञानदेहेन तत्त्वज्ञानस्य चिद्रूपेश्वरस्य देहेन शरीररूपेण व्याहृता उक्ताः । तेन तद्वाच्योऽपीश्वरः । कूर्म्मपुराणम् ।
"प्रधानं पुरुषः कालो ब्रह्मविष्णुमहेश्वराः ।
सत्त्वं रजस्तमस्तिस्रः क्रमाद्व्याहृतयः स्मृताः ॥"
एतद्रूपेणापि भावनीयाः । इत्याह्निकाचारतत्त्वम् ॥*॥ अपि च ।
"दिनान्तसन्ध्यां सूर्य्येण पूर्व्वामृक्षैर्युतां बुधः ।
उपतिष्ठेत् यथान्यायं सम्यगाचम्य पार्थिव ॥
सर्व्वकालमुपस्थानं सन्ध्यायाः पार्थिवेष्यते ।
अन्यत्र सूतकाशौचविभ्रमातुरभीतितः ॥
सूर्य्येणाभ्युदितो यस्तु त्यक्तः सूर्य्येण यः स्वपन्
अन्यत्रातुरभावाच्च प्रायश्चित्तीयते नरः ॥
तस्मादनुदिते सूर्य्ये समुत्थाय महीपते ।
उपतिष्ठे नरः सन्ध्यां सस्त्र्याञ्च दिनान्तजाम् ॥
उपतिष्ठन्ति वै सन्ध्यां ये न पूर्व्वां न पश्चिमाम्
व्रजन्ति ते दुरात्मानस्तामिस्रं नरकं नृप ॥"
इति विष्णुपुराणे ३ अंशे ११ अध्यायः ॥*॥
दीक्षितविशेषस्य सन्ध्याविशेषा यथा,—
भूमिरुवाच ।
"देवदेव कथं सन्ध्यां दीक्षितः कुरुते वद ।
केन मन्त्रेण वा भक्तास्तव कर्म्मपरायणाः ॥